पिण्डो वा कार्य्यं श्राद्धादिकं शु०त० क्वचित्” ब्रह्मपुरा०।

**अश्रुमुख** त्रि० अश्रुपूर्णं मुखं यस्य। नेत्रजलप्लुतमुखे स्त्रियां ङीप्। “पतिघ्नानाश्रुमुखी कृधुकर्णी च क्रोशतु अथ०११,११,७। [स्त्रियां ङीप् नेत्रजलयुक्ते।

**अश्रुशालिन्** त्रि० अश्रुणा शलते शल–णिनि ३त०।

**अश्रेयस्** त्रि० न श्रेयान्। हीनतरे। “अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात्” मनुः। स्त्रियां ङीप्।

**अश्रौत** त्रि० श्रुतौ विहितः विरोधे न०त०। श्रुतिविहित-विरुद्धे निषिद्धे नास्तिकाचारादौ। २वेदाविहितभिन्ने स्मृतिमात्रविहिते च।

**अश्लाघा** स्त्री अभावे न०त०। विकत्थनाभावे १आत्मगर्भाभावे न०ब०। विकत्थनशून्ये गर्व्वशून्ये २विनीते त्रि०। [च।

**अश्लिष्ट** त्रि० न०त०। १असङ्गते २असम्बन्धे ३श्लेषशून्ये काव्ये

**अश्लीक** त्रि० नास्ति श्रीर्ऽस्य कप् रस्य लः। श्रीप्रतिकूले श्रीनाशके। “अश्लीकमेतत् साधूनां यत्र जुह्वत्यमी हविः” मनुः।

**अश्लील** न० श्रियं लाति गृह्णाति ला-क रस्य लः, श्री+सिध्मादित्वात् ल वा न०त०। १लज्जादिसम्पादके वाक्ये २ग्राम्यभाषायाम्। “भास्करालोकनाश्लील परिवादांश्च वर्ज्जयेत्” या०स्मृ० ३काव्यदोषभेदे न० तच्च त्रिविधं यथा “दुःश्रवं त्रिविधाश्लीलानुचितार्थाप्रयुक्तता” सा०द० अश्लीलत्वं व्रीड़ाजुगुप्सामङ्गलव्यञ्जकत्वात्त्रिधा यथा “दृप्तारिविजये राजन्! साधनं सुमहत्तव” “प्रससार शनैर्वायुः”। “विनाशे तन्वि! ते सदा”। “अत्र साधनवायुविनाशशब्दा अश्लीलत्ववाचकाः” सा०द०। तत्र साधनशब्दस्य शिश्नस्यापि वाचकतया व्रीडायाः, वायुशब्दस्यापानवायुवाचकतया जुगुप्सायाः, विनाशशब्दस्य मरणवाचकतयाऽमङ्गलस्य च द्योतकता। यथाक्रमं च प्रकृते हेतुपवनविरहबोधकतायै प्रयुक्ता अपि ते अश्लीलव्यञ्जकत्वाद्दुष्टाः। ४निन्दाव्यञ्जके वाक्ये च “यमश्रुत्याश्लीला वा गच्छतीति” ता०ब्रा०“अश्लीला निन्दारूपा वाक्” भा० न श्रियं लाति ला–क। ५अश्रीके त्रि०। “यैवैनमसावश्लीलं वाग् वदति” ता०ब्रा० “अश्लीलमश्रीकरम्”भा०।

**अश्लेषा** स्त्री न श्लिष्यति यत्रोत्पन्नेन शिशुना श्लिष–घञ् न०त०। सप्तविंशतिधा विभक्तराशिचक्रस्य नवमे नक्षत्रे तन्नक्षत्रजातस्य शिशोःपित्रादिभिराषण्मासं दर्शनाभावस्याश्लेषाशान्तिप्रसङ्गे वक्ष्यमाणस्य सूचकतया तस्या अश्लेषात्वम्। तत्स्वरूपादिनिरूपणाय सर्व्वताराणां स्वरूपं, संख्याविशेषः, योगताराश्च प्रसङ्गादत्राभिधीयन्ते यथाह श्रीपतिः। “१तुरगमुखसदृक्षं २योनिरूपं ३क्षुराभं ४शकटनिभमथैणस्योत्तमाङ्गेन ५तुल्यम्। ६मणि ७गृह ८शर ९चक्राभानि १०शालोपमं च ११शयनसदृशमन्यच्चात्र १२पर्य्यङ्करूपम्। १३हस्ताकारमजस्रमौक्तिकसमं१४ चान्यत् १५प्रबालोपमम् विष्णुं तोरणवत् १६स्थितं १७बलिनिभं स्यात् कुण्डलाभं १८परम्। क्रुध्यत्केशरिविक्रमेण सदृशं१९शय्यासमानं २०परम् चान्यद्दन्तिविलासवत् २१स्थितमतः (अभिजित्) शृङ्गाटकव्यक्ति च। २२त्रिविक्रमाभञ्च २३मृदङ्गरूपं २४वृत्तं ततोऽन्यद्यमलद्वयाभम् २५। २६पर्य्यङ्कतुल्यं २७मुरजानुकारमित्येवमश्व्यादिभचक्ररूपम्” अत्राङ्कानुसारेणाश्व्यादीनां रूपाणि ज्ञेयानि। “वह्नित्रि ऋत्विषुगुणेन्दुकृताग्निभूतवाणाग्निनेत्रशरभूकुनगाग्निरामाः। रुद्राब्धिरामशुचिवेदशतद्वियुग्मदन्ता बुधैर्निगदिताः क्रमशोभतारा:”। यथा त्रितारास्विनो भरणी च। षट्ताराः कृत्तिका। पञ्चतारा रोहिणी। त्रितारा मृगशिरा। एकतारा आर्द्रा, चतुस्तारा पुनर्वसुः त्रितारा पुष्या, पञ्चतारा अश्लेषा मघा च त्रितारा पूर्व्वफल्गुनी द्वितारा उत्तरफल्गुनी पञ्चतारा हस्ता, एकतारा चित्रा, स्वातिश्च सप्ततारा विशाखा, त्रितारा अनुराधा ज्येष्ठा च। एकादशतारा मूला, चतुस्तारा पूर्व्वाषाढ़ा त्रितारा उत्तराषाढ़ा, श्रवणा चतुस्तारा धनिष्ठा शततारा शतभिषा। द्वितारा पूर्व्वभाद्रपदा उत्तरभाद्रपदा च द्वात्रिंशत्तारा रेवती” एषां योगतारा सूर्य्य सि०। “फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढ़योर्द्वयोः। विशाखाश्विनसौम्यानां योगतारोत्तरा” स्मृता एषामुक्तनक्षत्राणां प्रत्येकं स्वतारासु मुख्या उत्तरा उत्तरदिक्स्था तारा योगतारा। “पश्चिमोत्तरतारा या द्वितीया पश्चिमे स्थिता। हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा” सू०सि०। हस्तनक्षत्रं पञ्चतारात्मकं हस्तपञ्चाङ्गुलिसन्निवेशाकारं ततो नैर्ऋत्यदिगवस्थिता पश्चिमावस्थिततारायाः उत्तरदिगाश्रिततारायाः द्वितीया पूर्व्वोक्तातिरिक्ता पश्चिमे वायव्याश्रिते स्थिता सा हस्तस्य योगतारा ज्ञेया, उत्तरतारासन्ना पश्चिमाश्रिता तारा हस्तस्य योगतारा” धनिष्ठायास्तारासु या पश्चिमदिक्स्था सा तस्या योगतारा इति च रङ्गना०। “ज्येष्ठाश्रवणमैत्राणां वार्हस्पत्यस्य मध्यमा। भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा” सू०सि० “ज्येष्ठाश्रवणानुराधानां पुष्यस्य च प्रत्येकं तारात्रयात्मकत्वात् मध्यमतारा योग-